कविकल्पद्रुमः ।

महामहोपाध्याय श्रीवोपदेव गोस्वामी

विरचितोधातुग्रन्थः

परिभाषाटीका समेतः

गवर्णमेण्ट संस्कृत विद्यालयाध्यापक

श्रीतारानाथ तर्कवाचस्पति भट्टाचार्य्येण

संस्कृतः ।

KAVIKALPADRUMA

By

Vopadeva Goswami

Edited by

TARANATHA TARKAVACHASPATI.

PROFESSOR OF GRAMMAR GOOT: SANSCRIT COLLEGE.

CALCATTA.

Printed at the Ganesha Press.

1872.

कविकल्पद्रुमः ।

शब्दाकरकरग्राममर्थमण्डलमण्डलम् ।
ज्ञानात्मानमनाद्यन्तमादित्यं तमुपास्महे ॥

श्रीवोपदेवो धातुपाठं चिकीर्षुः प्रारिप्सितसमाप्तये शिष्टाचारप्राप्तं मङ्गलमाचरति शब्दाकरेत्यादि । तं प्रसिद्धमादित्यम् उपास्महे सेवामहे वयमितिशेषः । तच्छब्दोऽत्र प्रसिद्धार्थकत्वात् यच्छब्दं नापेक्षते तथाच "त केशपाशं प्रममीक्ष्य कुर्युर्बालप्रियत्वं शिथिलं चमर्य्यः" इति कालिदासः । ग्रन्थोत्कर्षख्यापनायादित्यस्य ग्रन्थस्वरूपतां प्रतिपादयन् विशेषणान्याह शब्दाकरेत्यादि । शब्दानामाकरा उत्पत्तिस्थानानि धातवइति यावत् तएव करग्रामः किरणसमूहो यस्य तम् अर्थानां मण्डलं समूहोमण्डलं यस्य तम् । तथाच "स्यान्मण्डलं द्वादशराजके च देशे समूहे ऽपि च चक्रवाड़" इति विश्वप्रकाशः । ज्ञानमात्मा यस्य तं न विद्येते आद्यन्तौ यस्य तंनित्यमित्यर्थः । पक्षे तं प्रसिद्धं पूर्व्वतरधातुग्रन्थम् उपास्महे आदित्यं सूर्य्यमिव इति लुप्तोपमा । "अयमुदयति मुद्राभञ्जनः पद्मिनीशा" मित्यादिवदसाधारणविशेषणैर्विशेष्योपस्थिति भवतीति तादृशविशेषणान्याह शब्दाकरेत्यादि । शब्दाकराः करग्राम इव यस्य तम् अर्थमण्डलं मण्डलमिव यस्य तम्

उभयत्र लुप्तोपमा । ज्ञानात्मानमिति ज्ञायते अनेनेति ज्ञानं ज्ञानसाधनं तदेव आत्मा यस्य तम् अनाद्यन्तमिति वेदाङ्गत्वान्नित्यमित्यर्थः ।

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥

सर्वेषां प्रवृत्त्यर्थम् आदिशाब्दिकानां मतमालोक्य क्रियत, इति वक्तव्ये आदौ जयशब्दपूर्वकं तन्त्रामानि संगृह्णाति "जेस्तुबन्धोस्तिवन्ती" इतिवक्तव्यादन्तुस्थाने अन्तिः जययुक्ताभवन्तु इत्यर्थः ।

मतानि तेषामालोक्य सर्वसाधारणः स्फुटः ।
धातुपाठः स्वादाद्यक्रमादन्तादिमक्रमः ।
कविकल्पद्रुमो नाम पद्यैर्निष्पाद्यतेऽत्र च ।
धातवः पठिताः पाठमूलश्लोकागमस्थिताः ।

अथ ग्रन्थस्वरूपं निरूपयति मतानीति । तेषामष्टानां मतानि ग्रन्थानालोक्य पद्यैः श्लोकैः कविकल्पद्रुमोनाम धातुपाठो निष्पाद्यते क्रियते मयेति यावत् । सर्वेषां प्रवृत्तये विशेषणान्याह सर्वसाधारण इत्यादि । सर्वेषां साधारणः समानः सर्वसम्मतत्वात् । सर्वशब्दस्त्विह बहुवादिपरः तेन क्रज क्रतावित्यादीनां केनचिदमन्यमानानामपि बहुवादिसम्मतत्वादिहोपन्यासः कुङ् गत्यामित्यादीनाञ्च केनचिन्मन्यमानानामपि बहु वाद्यसम्मतत्वादर्ज्जनमिति । स्फुटोव्यक्तः । धातवः पठ्यन्तेऽस्मिन्निति धातु-

पाठेग्रन्थः । अत् आद्योयेषां ते अदाद्याः ते आद्या यस्मिन् सोऽदाद्याद्यः सचासौ क्रमश्चेति अदाद्याद्यक्रमः सुष्ठु अदाद्याद्यक्रमो यस्मिन् स स्वदाद्याद्यक्रमः । अत् अन्तो येषां ते अदन्ताः ते आदिमा यस्मिन् सोऽदन्तादिमः अदन्तादिमःक्रमो यस्मिन् धातुपाठे स तथा पश्चात् कर्म्मधारयः । अकाराद्यादिधातुक्रमेणाकारान्तादिधातवो वक्तव्या इत्यर्थः । अत्रापि सुग्रन्थोपादानात् सजातीयमध्ये विजातीयो न पाठाइत्यधिककौशलमिह बोध्यं । यत्तु "अथ क्लदषमङ् चेति क्लदक्लिदिजङ् रुदि" इत्येतयोर्म्मध्ये कदादीनां पठनं तत् क्लदि तु रोदने आह्वाने इत्यस्मादादौ "क्लदिजङ् रुदीति" पृथग्वाक्यगौरवभयात् । एवं "स्तृञ्जस्तृताविति स्तृस्तृञ् प्रीतिरक्षाप्राणने" इत्येतयोर्म्मध्ये स्वादीनां पाठे ऽपि बोध्यम् । कवीनां परस्मैपदादिप्रमाणलिप्सूनां तत्तद्धात्वत्वेन कल्पद्रुम इवेति कविकल्पद्रुमः । नामेत्यव्ययम् । अभिधेयमाह अत्र चेति । अत्र ग्रन्थे पाठसूत्रलोकागमेषु स्थिताश्चतुर्विधा धातवः पठिताः पठितुमारब्धाः आदिकर्म्मणि क्तः साङ्गोपाङ्गैरिहोदिता इत्यमरोक्तवत् । पाठस्थिताः पूर्व्वाचार्य्याणां धातुपाठेषु स्थिताः भवतिपचतीत्यादयः । सूत्रस्थिता धातुपाठेषु न दृष्टाः स्तम्भेतिस्कम्भ्नोतीत्यादयः । लोकस्थिता धातुपाठेषु सूत्रेषु च न दृष्टा महाकविप्रयोगेषुदृष्टाः प्रेङ्खोलयत्यान्दोलयतीत्यादयः । आगमस्थिता भाषाविषयेषु

धातुपाठसूत्रलोकेषु न दृष्टा वेदेष्वेव प्रयुक्ता जगाति चकेतोत्यादयः ।

पदानिट्वेड्विकरणाद्यनुबन्धगणोदितम् ।
कर्म्मोच्चारणमात्रेण स्पष्टमत्रानुबन्धतः ।

प्रयोजनमाह पदेति । पदे परस्मैपदात्मनेपदे । अनिट् इमोऽभावः । वेट् इमोविकल्पः । विकरणाः शप्श्नादयः । आदिग्रहणात् यजादिभ्यादीनां ग्रहणम् अनुबन्धाश्च गणाश्च तैरुदितम् अनुबन्धगणोदितम् । अत्र ग्रन्थे अनुबन्धोदितं पदानिट्वेड्विकरणादि कर्म्म अनुबन्धतः स्पष्टं गणोदितं कर्म्म उच्चारणमात्रेण गणोच्चारणमात्रेण स्पष्टमिति व्युत्क्रमेणान्वयः । यथा औगम्ल गत्यामित्यत्र इमोऽभावः टाां ङप्रत्ययश्चानुबन्धोदितः । भ्वादित्वं परस्मैपदत्वं च विशेषविधानाभावात् गणोदितमिति ।

परोऽनुबन्धः पूर्व्वेषामेकवाक्यस्थधातुषु ।
नाम्रेडितानुबन्धेषु न परेषाञ्च मध्यमः ।

अत्र परिभाषा भाष्यते पर इति । वाक्यमर्थकथनपर्य्यन्तम्, एकवाक्यस्थितधातुषु परः परधातुपरस्थोऽनुबन्धः पूर्व्वतरेण सम्बन्धाभावेऽपि पूर्व्वेषां सर्व्वेषामित्यर्थः । यथा टीक टिकटीकत्वौकतिङ्ङ गत्यामित्यत्र ऋकारङ्कारौ सर्व्वेषामिति । "आम्रेडितं द्विरुक्त" मित्यमरः । पुनरुक्तैकानुबन्धेषु धातुषु नेयं व्यवस्था । तथाच मृषत्क मृष तञ् चान्तावित्यत्र तकारस्य पुनरुक्तत्वात् अकारो न पूर्वस्य । न परेषाञ्च

मध्यमः । मध्यमो धातुद्वयमध्यवर्त्ती अनुबन्धो द्वाभ्यां सम्बन्धेऽपि न परस्य यथा सृपत्क सृपतञ्चान्तावित्यत्र ककारो न परस्य ।

अचाकारः सुखार्थोऽयानिष्ठाभावादिकर्मवेट् ।
इर्नुणावोरनिड्निष्ठ, उः क्त्वावेडूस्तु वेट्क्त, ऋः ।
चड्यङ्क्सोः ऽय ऋर्वा, ल्यङ्क्त्वानिर्वाय एः सिचि ।
अद्वद्विरैर्यजादिः स्यादोर्निडातल, ओरनिट् ।
कयुरादिः, क्रिस्त्र वा रः व्यादि, र्णिः व्यादिरध्वः ।
स व्यादि, वौ रुधादि, ङ्क्सङ्क्त्वान् कर्त्तरि, आत्मने ।
जोज्वलाद्यो, जिरद्यक्त, ष्टुः साधु, ईं क्षिप्तयुक्तः ।
णः फणादि, स्तस्वदन्तो, दन्तजादि, भ्रुधादिकः ।
नः स्वादिः, पोषुचादि, भेः श्रमादि, र्भीणिजीक्रमोः ।
दीर्घोजा, णिचि क्रन्तो, णिर्वा, दिवाद्योयादादिकः ।
लुः स्वपादिश्च, लिर्ह्रीर्यी हृताहिः, श्नुस्तुदादिकः ।
शिः कुटादिश्च, ष्ठ्यङ्क्त्वान्, जोजजादो, ष्ठवेदिकः ।

अनुबन्धकृतान्याह । अचाकारः सुखार्थः आः अनुबन्धेषु मध्ये अकारः सुखार्थः सुखोच्चारणार्थः । यथा यक्त यक्तवन्नामनद्वत्वादौ । अथ आ निष्ठाभावादिकर्मवेट् आ आकारानुबन्धो धातुरूपधारात् एवमिकारादौ च बोध्यम् । निष्ठा क्तक्तवतू, निष्ठाया बाध्यत्वेन सम्बन्धिनो ये भावादिकर्म्मणी तयोः स्याने वा इट् यस्मात् स तथा । आकारेतो-धातोर्भावे आदिकर्मणि च विहितयोः क्तक्तवतोरिम् वा

इत्यर्थः यथा इर्मिव्यास्नेहे "भावादिढे वेति मित्रं मेदितं तेन" प्रमित्रः प्रमेदितः सः। भावादिकर्म्मभ्यामन्यत्र क्तवत्वेरिम् नेति शेषः, यथा आदितइति मित्रः मित्रवान्। इर्नुण्वान् यथा वदिङ् तुल्यभिधादयोः "अतएवेदितोनुण्" वन्द्यते विष्णुः। नकारमध्यपाठेनैवेष्टसिद्धौ इदनुबन्धकरणम् अगुणे नलोपनिषेधार्थम्। ईरनिङ्निष्ठः "दीपीङ्क्ष दीपने" "नेम्डोश्खोति" दीप्तः दीप्तवान्। उः क्लावेट् "चमु भक्षे" "पुक्लिशुदितइति" चमित्वा चान्त्वा। ऊस्तु वेट्कः सामान्यविधिना यस्य स्थाने इम् विहितः ऊदितः परस्य तस्य इस्वा। मिधृ गिवे शास्त्रे "वेमूदिति" असेधीत् असैत्सीत्। ऋदङ्गङ्क्षस्वः। चङि अः परेऽङि नास्ति ङ्क्षस्वो यस्य सोऽङ्क्षस्वः। ढौक्षङ् गत्यां "आङ्ढौङः ख्व" इत्यच ऋदिदङ्गनात् अढौकत्। अथ ऋर्वा। चङि अङ्क्षस्व इत्यनुवर्त्तते कमु आर्त्तस्वरे आजभ्राशेति अचीकमत् अच कमत्। वेषां सप्तमस्वरानुबन्धः केचित् पठन्ति केचिन्न पठन्ति च तेषां ङ्क्षस्वत्वि कल्पनापनार्थोऽयमनुबन्धः। ल्लरङ्वान् औगम्ल्ल गत्यां "आलुलिहादिति" अगमत्। ऊर्वा अङ्क्षस्वानित्यनुवर्त्तते च्युतिर क्षरणे "इरितस्तु वेति" अच्युतत् अचीतीत्। अथ एः सिचि अवृद्धिः। सिचि ङ्यां विहिते सौ कटे वृतो वृषि हसादेःसेमइत्यच एदिद्वर्जनात् अकटीत्। ऐर्यजादिः स्यात् यजैञ "व्यथग्रहेति" इयाज गङ्क्षपाद्योरिति इत्वा। ओर्निष्ठातनः निष्ठायास्तो सोऽनाल्य नि-

ष्ठातनः रुजो शौ भङ्गे "सूल्वाद्योरिति" रुग्णः रुग्णवान्। "औरनिट् मस्जोश्च ट्वौ" वसोरस्यैत्व औदिद्वर्जनात् अमाङ्क्षीत्। कथ्वादिः। गणत्क संख्याने "चुर्भ्वोः जिरिति" गणयति। किन्तु वा चुरादिर्वा पक्षे गणान्तरनियमाभावात्सामान्यगणोभ्वादिरित्यर्थः युजकि संयमे योजयति योजति। चुर्भ्वोजिर्वा इत्यत्र वा शब्दस्य व्यवस्थावाचित्वात् चुरादेर्जिर्नित्यः चुरादयन्तर्गणात् युजादेस्तु वा इति। यत्तु चुरधातोरपि किकारानुबन्धत्वं मुग्धबोधे चोरयति चोरतोत्युदाहरणञ्च तत्कदाचित् चुरादेर्जिरनित्यत्वज्ञापनार्थम् अतएव काव्यकामधेनौ अकिक् लक्षणीत्यत्र स्फुटीकृतमिदं दीपदेवेन। गः क्र्यादिः, डुक्रीञ्ग द्रव्यपर्य्यये "दिवमुतुदेति" क्रीणाति। गिः प्वादिरपि। अपिशब्दात् क्र्यादिश्च पूत्रगि शोधे "प्वादेः ष्व" इति पुनाति। अपूः स प्वादिः। पूवर्जितः स प्वादिर्ल्वादिश्च स्यात्। लूञ गि च्छिदि लुनाति। "सूल्वाद्योरिति" लूनः लूनवान्। "क्र्यृत्र्येति" लूनिः। घोरुदादिः। रुविर रुद रोदे "रुद्रोऽ वोहस्रेति" रोदिति। "रुदादयस्तोति" अरोदीत्। ङस्ङवान् कर्त्तरि, कर्त्तरि वाच्ये तङ्वान् आत्मनेपदी। एधङ् वृद्धौ "नवग्रः-पमे" इति एधते। आत्मने। कर्त्तरि तङ्वानित्यनुवर्त्तते आत्मने आत्मार्थं फलवति कर्त्तर्य्यात्मनेपदीत्यर्थः अफलवति परस्मैपदीति भेदः। यजैजौ यजते यजमानः यजति याजकः। जिस्वाद्यवशःपमे इत्यादिनोभयपदप्राप्तौ जिभ्रज्जाल्पिपिद्या-

दिना नियम्यते नियमश्च फलवत्कर्त्तर्येवात्मनेपदमिति चेत्तर्हि अफलवत्कर्त्तर्यात्मनेपदनिषेधे फलवत्कर्त्तरि परस्मैपदापत्तिः। फलवत्कर्त्तर्यात्मनेपदमेवेति चेत् तर्हि फलवत्कर्त्तरि परस्मैपदनिषेधे अफलवत्कर्त्तर्यात्मनेपदापत्तिरित्युभयत्रैव व्याघातः। वस्तुतस्तु उभयपदप्राप्तौ व्यवस्थेयं फलव्यात्मनेपदम् अफलवति परस्मैपदमिति। एतच्च पाणिनेरनुरोधात् तथाच वर्द्धमानः। इति लौकिकवाक्येषु व्यभिचारोऽतिपुष्कलः। वेदवाक्येषु यद्यस्ति नियमः केन धार्य्यते। विशेषः पाणिनेरिष्टः सामान्यं सर्व्ववर्षणः। सामान्यमनुरुध्यन्ते तत्राचार्य्यपरम्परेति। एतेन "अक्षरादचिरेश्वरः चितौ द्विषदारभक्षतानि भस्मसात्" इति रघुः। "तनोति शुभ्रं गुणसम्पदा यशः" इत्यादौ फलवत्कर्त्तरि परस्मैपदम्। "फलं विश्वोपकाराय धत्ते पर्व्वणि पर्व्वणीति"। "आत्मजयनोद्घाटनं कुर्व्वते ये"। ये कृधिरक्षयः। एवादिकं फलवत्कर्त्तर्यात्मनेपदमिति। पुराणेषु स्वार्थे णिलितेर्जकारेण जिच्छेऽप्युभयपदं न स्यात् अन्यथा स्वमजयत्पितरं इत्यादेर्जामुबन्योद्धता स्यात्। यत्तु धातुपाठेषणगुप्त्यवधीरणेषु चेरयते इत्युभयपदोदाहरणं तत्प्रयोजकव्यापारविवक्षयात्मनेपदस्य रामायणार्थम्। यद्वा नैवधे। "नालोक्यते यदेदानीं तदिदं तेन तर्क्यते" इति। अत्र केचित्तु "आत्मनेपदमिच्छन्ति परस्मैपदिनो जनाः" इति न्यायमवलम्बन्ते। जोजनाः। ज्वल जल

चलत्विषोः "दूनीभूज्वलादयेति" णः ज्वालः पचे पचादित्वादन् ज्वलः। एवं कुच ज्रोधपर्ककौटिल्यलेखने दूनी भूज्वलेति णः कोचः पचे ऋगृज्ञाप्रीति कः कुचः। जिः अद्यक्तः अद्य वर्त्तमाने क्तोयस्मात् सोऽद्यक्तः। जिष्ठा स्थाने "ज्ञार्चेच्छार्थेति" स्थितोविष्णुस्तिष्ठतीत्यर्थः। टुः साधुः। ऋटृङ वेप चले "ट्वितोऽथुरिति" वेपथुः। ङस्त्रिमग्युतः। छत्रदडु क्षतौ "ङितस्त्रञ्" इति त्रिमक् क्षत्रिमम्। णः फणादिः फणण निस्नेहे "धृफलेति" फेणतुः पफणतुः फेणिथ पफणिथ। तस्वदन्तः। अदन्तानां पृथग्वर्गविधानेनैव ज्ञाने सिद्धे तानुबन्धोऽङ्गादीनां कान्तत्वादिभ्रमनिरासार्थः। दस्तनादिः। तनुदञ विस्तृतौ। "तन्भ्यः शुविति" तनोति। "सेर्लुक् तथासोरिति" अतत अतनिष्ट अतथाः अतनिष्ठाः। "वनतनाद्यनिमामिति" प्रतत्व। ध् रुधादिकः। रुधिर्धौञि आवृतौ "दिवसुतुदेति" रुणद्धि। नः स्वादिः। षुञ् सन्धा क्लेदपीडमन्थे "दिवसुतुदेति" सुनोति। षोमुचादिः मुच्च ल्रश्रपत्रो मोक्षे "नुग्रधोमुचामिति" मुञ्चति। भ शमादिः शमुभिर्य शमे "यन्योशमादीति" शाम्यति। मोणिचोस्मोर्दीर्घो वा। घटष्ङम चेष्टे "जोस्मोस्तुर्घश्चेति" अघटि अघाटि घटम्घट घाटंघाटम्। णिचि ह्रस्वः मोऽनुवर्त्तते णिचि जो ह्रस्वोह्रस्ववान्। "घटादिजनीति" घटयति। मिर्व्वा। णिचि ह्रस्व इत्यनुवर्त्तते। फणमिण गतौ 'वा शमेति' फणयति फाणयति। दिवाद्योयः दिव्यु जिगीषादौ "दिव-

सुतुदेति दोष्यति। लृ अदादिकः। अदृलोभक्षणे "लुगदृभ्योऽपः" अत्ति। लुः स्वपादिश्च चकारादृदादिश्च स्वमते स्वपादेः प्रयोजनं नास्ति। दरिद्रतीत्यादौ स्वपादित्वादजादौ सार्वधातुके आद्याक्षरस्य उदात्तस्वरत्वभवति आद्युदात्तत्वमिति वोपदेवः। लिर्ह्रादिः। ह्रादेरदाद्यन्तर्गणत्वेन स्न्यातन्व्रादृदादित्वसूच कानुबन्धोन कृतः। अथवा लुः स्वपा दिश्च ह्रादिरित्येकं वाक्यम्। लु लि इत्युभयानुबन्धौ धातू क्रमात् स्वपादिह्रादी स्तः काकाक्षिगोलकन्यायेन चकार स्योभयसम्बन्धाददादौ च इत्यर्थः। ह्रादिः पृथग्गणइत्येके अतएव पठन्ति च।

"स्वाद्यदादौ जुहोत्यादिर्हिवादिस्वादि रेव च। तुदादिश्च रुधादिश्च तनक्र्यादिचुरादयइति"। हुलि होमेऽदने "ह्रादीरे हिः" जुहोति। वीङ्तादिः। व्रत ङुव ल्ट वर्त्तने "व्रङ्गोनेम्यइति" तेनैव परस्मैपदे वर्त्स्यति विव्रत्स्यति आत्मनेपदे तु वर्त्तिष्यते अन्यत्र विव्रत्सा विवर्त्तिषा। गः तुदादिकः तुद जैाग व्यथे "दिवसुतुदेति" तुदति। शिः कुटादिश्च। चकारात्तुदादिश्च। "कुटां णुव्रौ ञ्णितोति" नियमात् कुट शि कौटिल्ये इत्यादीनाम् अकुटीदित्यादौ नगुणः। ण् शि स्तुवने इत्यादीनाम् अनुवीत इत्यादौ न वृद्धिः अगुणत्वादृवच। षक्रदङ्वान्। आख्यातिकस्याङोऽप्रामार्थं क्रदिति विशेषणम्। स्वमते तूभयत्र ङ्वव। डुपचो प पच पाके "भौपिचिन्तोति" पचा।

क्षीजक्षादिः। जक्ष च्लुष भक्षहासयोः "द्विरुक्तजक्षेति द्विसंज्ञायां। "व्रिदचोऽदेरिति" न नुण् जक्षत्, क्लीवे जसशसोस्तु 'दे: शतुरिति। जक्षति जक्षन्ति। आख्यातिकेऽन्तौ "अन्तोऽदे" रिति जक्षति। "अनुस्सिदेरिति" अजक्षुः। र वैदिकः। वैदिकोवेदेष्वेव प्रयुक्तोन तु भाषायामित्यर्थः। गार्लिस्तुतौ जगाति।

धातवोहन्त्यर्थाभासार्थाअकितोवा चुरादयः।

इत्यनुबन्धेन फलं निरूप्य अर्थेनैव प्रयोजनं प्रथयति धातवः इति। हन्त्यर्थाहिंसार्थाः हन्तेर्हिंसार्थएव प्रसिद्धत्वात्। भासार्थादीप्त्यर्थाः। घटि क्वापि द्युताविल्यत्र द्युत्यर्थेऽपि किकरणमर्थान्तरार्थमिति वोपदेवस्वरसात्। हन्त्यर्था भासार्थाश्च ये धातवः तेऽकितोपि गणान्तरपठिताश्चुरादयः स्युः। वाशब्दस्यानुक्तसमुच्चयार्थत्वात् कदाचिदन्येऽपि चुरादयः स्युरित्यर्थः। एवमेव धातुपारायणक्रमदीक्षरौ। यथा हन्लौ गतौ बधे घातयति हन्तीत्यर्थः। शुभ ङक्ष दीप्तौ शोभयति शोभतइत्यर्थः। अन्येषान्तु "इन्द्रियादेरसामर्थ्यं वक्ष्यमाणमदीदिशत्," इति भट्टवार्त्तिकम्। "दृष्टे सूर्ये पुनरपि भवान् वाहयेदध्वशेष" मिति कालिदासः। "कोकिलो विष्णुरूपेण राजकन्यामजीहरत्" इतिपञ्चतन्त्रम्। "दशवर्षसहस्राणि रामोराज्यमकारयदिति," व्यासः।

क्रादिःक्रगृदृधृ प्रच्छो मुच्द्रुह्ष्णुह नश्णिहः।

मुहादिर्ङिदलन्तोऽनुदात्तेदृलृडिन्द्युतादिकः ।

अथ स्वरूपेण फलं निरूपयति क्रादिरिति । क्रृश विक्षेपे, गृश निगरणे, हृङ्शादरे, धृशङ्स्थितौ, प्रच्छौश ज्ञीप्सने इति पञ्च । फलन्तु एभ्यः सनइमि चिकरिषतीत्यादि । स्वमते "स्निङ्पूङ्रन्जश्चित्यादिसूत्रे" एषां ग्रहणात् क्रादेः फला भावः । मुहादिरिति । मुह्यूलज्जि वैचित्ये, लट्रुह्यूजिवांसे, ष्णुह्यूल्ल उद्गारे, णश लंयू नाशे, ष्णिह्यूलज्जि प्रीतौ । फलन्तु "मुहां घड्वेति," मुक् मोग्धा । "होढो भावितिं" मुट् मोढा इत्यादि । द्रुहस्तु घडोऽप्राप्तिपक्षे होढोभावित्यनेन ढएव न "तु दादेर्घ" इत्यनेन घः अन्यथा दादेर्घइत्यनेनैवेष्टसिद्धौ मुहादावस्य पाठो व्यर्थः स्यात् । ङिदलन्तोऽनुदात्तेत् ङानुबन्धोहलन्तोहसन्तोयोधातुः सोऽनुदात्तेत् अनुदात्तस्वरानुबन्धः परिभाषित इत्यर्थः । तेषां वेदेष्वेवोच्चारणभेदोऽस्तीति फलम् । आत्मने पदङ्चेति केचित् । लृडिन्द्युतादिकः इत्युभयानुबन्धो धातुर्द्युतादिः स्यात् । द्यु ल्लङ् द्युत्यां, "शास लिदुदिति" परस्मैपदे अद्युतत् । लिदित्यनेनैवेष्टसिद्धौ द्युतादिपाठः प्राचामनुरोधात् ।

ष्णिष्णिङोगोयुरुनुस्नु ष्णुक्ष्णु हृङ्व्रज्विवर्जिताः ।
एकस्वरा आदिवर्णोहृदन्ता धातवोऽनिटः ।

इतिपरिभाषा ।

ट्वायोश्चौर्गतिवृद्धेग्राः, श्रिञ सेवने, ओ डीङ य गतौ डीङ च नभोगतौ, शोङ लञि स्वप्ने, युल मिश्रणे, रुल ध्वनौ, रुङ बधे गत्यां, षु ल प्रसुत्यां, क्षुल तेजने, टुक्षुल क्षुते, णु ल स्तुतौ, हृङग सम्भक्तौ, हनगञ हतौ। ह इत्यनेनैवेष्टसिद्धौ उभयग्रहणं स्वरूपस्य कस्यचिदप्राप्त्यर्थम् तेन युङगबन्धे इत्यस्मादिम् न स्यात्। श्ञ्यादिवर्जिता एकस्वरा ये आकारान्ता इवर्णान्ता उकारान्ता ऋकारान्ताश्चतेभ्यः सामान्यविधानादिम् न स्यात् यथा नेमेकाजाद्यृदृत इति। पाता जेता क्रेता श्रोता कर्त्ता। विशेषविधानात्तु स्यादेव। यथा यमरमनमेति अपामिष्टाम्। सुस्वधाःसेरिति असावीत् अधावीत्। स्वस्वर्डन इति करिष्यति। श्ञ्यादेस्तु श्ञयितेत्यादि। इतिपरिभाषेति वक्ष्यमाणग्रन्थस्य संज्ञेपनिर्व्वाहार्थं सङ्केतविशेषः परिभाषा इत्यर्थः।

अथ धातवो निर्द्धार्य्यन्ते। तत्रादावदन्ताः तेषु च मृष तज् वर्जेषु ककारोऽनुबन्धः सर्वेषु तकारः। ननु हसाल्लोप इत्यनेनाल्लोपस्य नित्यत्वाददन्तत्वं व्यर्थमिति चेन्न यतः

अल्लोपित्वं स्थानिवत्त्वञ्चादन्तत्वप्रयोजनम्।
यत्र त्वेते न विद्येते तत्राल्लोपविकल्पनम्।
तद्बलादन्त्यदीर्घश्च पुक् चेत्यङ्गापयत्यतइति।

यथा अल्लोपित्वेन अजगवेषदित्यादौ न ह्रस्वसन्वङ्भावौ। लोपोऽव्यादेशउच्यते इति न्यायात् स्थानिवत्त्वेन कुणयतीत्यादौ न गुणः गणयतीत्यादौ न वृद्धिः। यत्र तु एते न

विद्येते अग्लोपित्वस्थानिवत्त्वयोः प्रयोजनं न सम्भवति तत्र धातौ तदन्तस्वीकारबलात् अग्लोपविकल्पनम् अकारस्य स्थितिपक्षे दीर्घः पुक् च आदन्तात् पन् च स्यादतोऽङ्गापयतीति सिद्धमिति केचित्। स्वमते तु अग्लोपित्वस्थानिवत्त्वयोः कार्य्यं येषु न स्यात् ते धातवो हसन्ता एवावगन्तव्याः तेन अङ्गापयतीत्यादिप्रयोगाः स्वमतविरुद्धा इति बोद्धव्यम् नच स्वमतविरुद्धानामिहोपन्यासोऽपि विरुद्ध इति वाच्यम् अष्टानां मतान्यालोक्य कर्त्तव्ये परमतोपन्यासेऽपि दोषाभावात् अन्यथा कैश्चिदमन्यमानस्य क्षज्ञतेति भौवादिकस्य पाठो विरुद्धः स्यात्। किञ्च यदि तत्तन्मतैकवाक्यता क्रियते तदाग्लोपविकल्पोऽन्यदीर्घश्च मनीषादित्वात् साध्यः। यथा अङ्कधोर्जिः हसाल्लोपइति अल्लोपः टीविभक्तेर्दिः जिश्रीत्यङ्—

"नकारजावनुस्वारपञ्चमौ झलिधातुषु।
सकारजः शकारश्च षाट्वर्गस्तवर्गजः"॥

इति वचनात् ङस्य नप्रकृतित्वे स्यादौ नवद्र इति ङकारं हित्वा कि इत्यस्य द्वित्वे कस्य चत्वे निमित्ताभावे नैमित्तिकस्याप्यभावः इति ङस्य नत्वे नस्यानुस्वारे तस्य च ञत्वे आञ्चिकादिति। केचित्तु अङ्कइति ङप्रकृतिं मन्वानाः अङ्कि इत्यस्य ङेर्द्वित्वे आञ्जिङ्कदित्याहुः। अत्र ङस्वसन्वद्भावयोरसम्भवः। अग्लोपित्वस्य गुणवृद्धेरसम्भवात् न स्थानिवत्त्वमिति। केचित्तु द्वित्वेऽपि अकारलोपस्य स्थानिवत्त्वं

मन्वानाः क इत्यस्य स्थिते अग्लोपिपात्रसन्वत् कार्य्यम् इत्यत आश्वकादित्युदाहरन्ति ।

अकारान्तवर्गः ।

अङ्गाङ्ग त्क पदे लक्ष्मणंशांस त्क विभाजने ।
अर्थ त्कङ् याचने ऽन्ध त्क दृक्क्षयेऽघ त्क तत्क्षतौ ।
अवधीर त्क वञ्चायामान्दोल त्क दोलने ।
जन त्क परिहाणे स्यादोज त्क बलतेजसोः ।
कथ त्क वाक्यप्रबन्धे कल त्क गतिसङ्ख्ययोः ।
स्यात्कर्त्र कच कर्त्त त्क शैथिल्ये कर्ण तक् भिदि ।
काल त्क कालोपदेशे कुण त्काभाषमन्त्रयोः ।
स्यात् कुमार कुमाल त्क केलौ केत त्क मन्त्रणे ।
निश्चावणेऽथ कूण त्क सङ्कोचेऽथ कुह त्कङ ।
विस्मायनेऽथ कूट त्क दाहे मन्त्रे क्षप त्क तु ।
दौर्बल्ये क्षप तक्ष स्यात् क्षेपे खच त्क बन्धने ।
खोट खोड़ तक क्षेपे खेट खेड़ त्क भक्षणे ।
गद त्काभ्रध्वनौ गर्व्व त्कङ् दर्पेऽथ गृह त्कङ ।
ग्रहे गण त्क सङ्ख्याने गवेष तक मार्गणे ।
गोम त्क लेपने गाच त्कङ् शैथिल्ये गुण त्क तु ।
मन्त्रे गह त्क गहने चिच त्क चयिकेक्षणे ।
लेख्येऽङ्कते चह त्क स्यात् शाठ्ये छद त्क संवृतौ ।
छिद्र त्क भेदे छेद त्क छेदे तीर त्क कर्म्मणाम् ।

समाप्तावथ तृण त्क सङ्कोचे तुत्थ तक् स्तुतौ ।
दुःख त्क तत्कृतौ दण्ड त् कतत्पाते ध्वन त्क तु ।
शब्दे निवास तक् स्तुत्यां प्रेङ्खोल तक चापले ।
पट त्क वेष्टने पर्ण त्क हारित्ये पद त्कङ ।
गतौ पश पश त्कानुपसर्गाद्बन्धबाधयोः ।
स्पर्शगत्योः पत त्कैश्यगत्योः पार त्क तीरवत् ।
पल्यूल पल्यूल त्क स्यात् लूनिपूत्योः पुट त्क तु ।
संसर्गे पच त्क परिग्रहे भाम त्क कोपने ।
भाज त्क तु पृथक्त्वां मृग त्कङ तु मार्गणे ।
मह त्क पूजे मूच त्क प्रस्रावे मल तक् धृतौ ।
मृष त्क मृष तज् क्षान्तौ मिश्र त्क् युत्यां रह त्क तु ।
त्यागे रस त्क त्वास्वादे स्नेहे रूप त्क तत्कृतौ ।
रच त्क क्रत्यां रूच त्क पारुष्ये रङ्ग तक् गतौ ।
रूष त्क स्याद्विस्फुरणे लज लज्ज त्क भासने ।
लड लाड तक क्षेपे लल त्कोपे वर त्क च ।
वर्ण त्क स्तुतिविस्तारशुक्लाद्युद्युक्तिदीपने ।
वस त्क वासे वास त्कोपसेवायां व्यय त्क तु ।
गतौ वित्त त्क च त्यागे वात त्क गतिसेवयोः ।
सुखे वेल त्क कालार्थे वेल्ल त्क दृशि वरट तक् ।
भागे वट त्क वेष्टे च बल्यूल वल्युल त्क तु ।
पल्यूलार्थेऽथ वीज त्क व्यजने वीर तङ तु ।
शौर्ये व्रण त्काङ्गचूर्णे अथ शार श्वथ त्क तु ।

दोर्ब्बन्धे श्राम तक् मन्थे शूर त्कङ् विक्रमे शठ ।
षम ष्टम त्क वैक्लव्ये सान्त्व साम त्क सान्त्वने ।
संग्राम ङ्जतक् युद्धे स्पृह त्केप्से सट त्क तु ।
प्रकाशने सभाज त्क सेवने प्रीतिदर्शने ।
स्थूल त्कङ् ब्रंहणे सूच त्क ग्रन्थे सच तङ्ग तु ।
सम्बन्धे सन्दतौ सूच त्क पैशुन्ये स्वर त्क तु ।
आक्षेपे स्तेन तक् चौर्य्ये स्तोम त्क श्लाघने स्तन त् ।
काम्यशब्दे सार तक दौर्ब्बल्ये सुख त्क तत्प्रतौ ।
स्फुट त्क स्फाडिसरणे स्कन्द त्क तु समाहतौ ।
स्वन स्वम तकध्वाने हिल्लोल तक दोलने ।
इत्यकारन्तधातूनां महाविंशच्छतं मतम् ।

आकारान्तवर्गः ।

ख्या ल् ख्यातौ कथने गा लिं स्तुतौ जन्मनि गा ङ्गतौ ।
घ्रा गन्धग्रहणे ज्या गि जरादां ज्ञा ग बोधने ।
ज्ञा क्ल मारणत्राणोके निशाने तोषणे स्तुतौ ।
ज्ञा क् प्रेरणे दा ल लूनौ दा तु दाने डु दा ञि च ।
दरिद्र च्च लु दुर्गत्यां द्रा ल स्वप्ने पलायने ।
डु धा ञि धारणे पुष्टौ दाने धाग्नियुतौ ध्वनौ ।
पा ल भक्षे प्रा ल पूर्त्तौ पा पाने पा ल रक्षणे ।
भा ल्घ दीप्तौ मा ङि ग्रन्थे मा ल्च मानेऽथ मा ङ्थ च ।
म्नाभ्यासे या ल्गतौ रा ल दाने सा ल् च ग्रहेऽथ वा ञ् ।

सुखाग्निगतिसेवासु स्यादा ल् गमनहिंसयोः ।
आ ल् खेदे आ ल्ल पाके ञि ष्ठा स्थाने ष्णा ल शौधने ।
ओ हाक्लि त्याग ओ हाङ्लि गतावान्तास्त्रिरष्टधा ।

इकारान्तवर्गः ।

इ इ ल् गतावधी ल् स्मृत्यामधोङ्ध्ययने र्कि लि ।
ज्ञाने ञि न् ग ष हिंसायां ञि ञ्चैश्वर्य्ययोः ञि श ।
वासगत्योश्चिरिर्न हिंसे चिन् चिञ् चित्यान्तु चिकि च ।
जिरिर्नहिंसे ज्याभिभवे जि जये चाथ धि श् धृतौ ।
पि श् गतौ ङुमि अन् चेधे रि श् गतौ श्वि ञ सेवने ।
ग्नि नञ् निशाने ट्वायोश्चोर्गतिवृद्धोः षि ङ स्मिते ।
षि न्गञ् बन्धे ष्वि काङ नादरे हिन् वर्द्धने गतौ ।
एकोनविंशतिरमी इकारान्तास्तु धातवः ।

ईकारान्तवर्गः ।

ई ल कान्ति-गति-व्याप्ति-क्षेप-प्रजन-खादने ।
ई ङ्य गत्यां क्षी ञ हिंसे डु क्री ञ द्रव्यपर्य्यये ।
ज्ञो गि कि ज्ञान ओ डी ङ्य गतौ डी ङ्च नभोगतौ ।
णी ञ प्रापण ओ दी ङ्य क्षये दीधी र्ङ्लु देवने ।
दीमावोधी ङ्य आराधे नादरे प्रीञ् तर्पणे ।
ष्टी ञ्च प्री गञ कान्तौ च प्री ङ्य प्रीतौ तु यी ङ्यक्तु ।
ञि ञि भी लि भित्यां भ्री ग गि भृत्याञ्च मी ङ्य तु ।

मी ञ ग् वधे मी कि गत्यां मत्यां री गि रवे गतौ ।
ओ री ङ्य चरणे ली कि द्रावणे ली ङ्य ओ श्लिषि ।
ली ल्यो गि च ल्वो गिग गत्यां वेवी च्लुङ् वी ल ईलवत् ।
व्रो गिग हत्यां व्रोङ् य ओ च वी गि गत्याच्च शो ङ्जि ।
स्वप्ने ओ ञ ग् पचि क्ष्वी लि लज्जेऽमी पञ्चविंशतिः ।

उकारान्तवर्गः ।

उ ङ शब्दे ऊर्णु लज्राच्छादने टु चु ल चुते ।
कु ङ् शब्दे कुल्च् कु शिङार्त्तस्वरे ष्णु ल तेजने ।
खुङ् ध्वनौ गु शि ओ विष्टोत्सर्गे गु घु ङु ङ ध्वनौ ।
चु क् हासे सहने च्यु छु ज्यु जु ङ् गत्यां जु रंहसि ।
णु ल् स्तुतौ तु ल् वृत्तिहिंसापूर्त्तिषु दु स्तुतौ गतौ ।
द्रु र्व दु ट्वोऽनुतापे दु गतौ द्यु लभिसर्पणे ।
धु ञ् कम्पे ञि धृ शि धृ स्वैर्य्ये प्रु प्लु ङ च सर्पणे ।
यु लिमश्रणेऽमिश्रणे युञ् ग बन्धे युङ् निन्दने ।
रु ल् ध्वनौ रु ङ् वधे गत्यां श्रु गतौ श्रु न् गतौ श्रुतौ ।
पु ञ् सन्धाक्लेदपीडामर्त्तेषु पु ञ गतौ पु च ।
षु ल्चेश्वर्य्यप्रसवयोः षु ल्प्रस्नुत्यां ष्टु ञ ल्स्तुतौ ।
सु ष्वर्थे सु ञ् यतौ स्नु ञ्च अनृतौ सु द्रुवत् हु लि ।
होमेऽदने क्षु ङ्लु चौर्य्ये त्रयस्त्रिंशदुदन्तकाः ।

ऊकारान्तवर्गः ।

कू शि ङार्त्तस्वरे कू ञ् ग शब्दे गू ओ शि विट्स्रजो ।

णू अि स्तवन ओ दू ङ्य खेदे दू न्गञ् बधे गतौ ।
धू शिक् कम्पे ध्लगि धू अच् पूङ् शोधे पू ङ्य पूञ् गि च ।
ब्रू ल अुक्तौ भू कङ् भू अ प्राप्तौ भू क् शुद्धिचिन्तयोः ।
मिञ्णे भू तु सत्तायां मू ङ् बन्धे लू गिञ् छिदि ।
पू ङ्ल षू योङ् सूतौ ष् शू क्षेपे अतस्त्रयोदश ।

ऋकारान्तवर्गः ।

ऋ र्न हिंसे ऋ लि गत्याम् प्रापे च क्ल अन् बधे ।
क्ल ञ् क्लतौ क्ल अद् ङु च ग्ट घृ सेके घृ र्लि भासि च ।
घृ क् सेके क्षादने जृ न्यक्कारे जाग्ट क्लु जागरे ।
दृ ङ्गादरे इृ स्थगने ध्वृ कौटिल्ये धृ श ङ् स्थितौ ।
धृ च्च धृत्यां धृ क्च धृ ङ्वध्वंसे पृ लि पालने ।
पृ क्च पूर्त्तौ पृ न प्रीतौ पृ शङ् व्यायामके भृ लि ।
टुडु भृ ञ् भृतिपुष्टयोर्भृ शङ् भृतौ ह्न ह्न ह्न ह्नतौ ।
ह्न क्चाय ह्न ङ्ग सम्भक्तौ स्तृ ञ अस्रोपतापयोः ।
स्तृ नञ् स्तृतौ स्त्र क्च स्त्र र्लि स्त्र गतौ स्म स्मृतौ स्मृ म ।
औन्ध्ये स्नृ स्नृ न् प्रीतिरक्षाप्राणने ह्नृ ध्रुवत् ह्न लि र् ।
प्रमत्तक्लत्यां ह्न ञ् ह्नत्याह्नदन्तास्त्वेकविंशतिः ।

ऋदन्तवर्गः ।

कृ गि गत्यां कृ ञ्गि हिंसे कृ श् विक्षेपेऽथ कृ कङ ।
विज्ञाने गृ कृ विज्ञापे च गृ शिगरणेऽथ गृ ।
गि शब्दे ज गि कि ज्ञाने ज दूर्षस्य च भ ष्य च ।

तॄ तरेऽभिभवे प्लत्यां इ गि इ न् भिवि इ य गि।
विदारे नृ गि नृ स्तीतौ जि भृ गि लि तु पालने।
पृ क्च पूर्त्तौ डु गि डुत्यां भृत्यां भृ गि भृतौ भृजि।
भर्त्सं सृ गि बधे डु गिञ् डुत्यां शृ स्तृ गि हिंसने।
स्तृ जगि च्छादने प्रोक्ता ऋकारान्तास्तु षोडश।

एकारान्तवर्गः।

दे ङ् पालनेऽथ धे ट् पाने मे ङ् प्रतीदानएे ज वे।
स्यूतौ ष्ये जे डुतौ ह्वे जै स्पर्द्धे शब्दे षड़ेपराः।

ऐकारान्तवर्गः।

कै शब्दे चै चये खै तु स्थैर्य्ये खननहिंसयोः।
गै गाने ग्लै ग्लमेऽथो जै चये त्रै ङ् पालनेऽथ दै प्।
शोधने दो न्यक्करणे द्रै स्वप्ने ध्यै तु चिन्तने।
म्रै टप्तो प्यै ङ् डुडौ पै शोषे ग्लै कान्तिसंक्षये।
रै शब्द श्रो वै शोषे त्यै खेटे त्यै म्यचने मतः।
म्यै ङ् गतौ षै क्षयेऽथ ष्टै वेष्टे ष्ठ्यै संहतौ ध्वनौ।
स्यै च स्त्यै पचि सै चित्यामैदन्ताः पञ्चविंशतिः।

ओकारान्तवर्गः।

क्ष्णो य क्ष्नौ ज्यो ङ्नियमव्रतादेशोपनीतिषु।
दो य च्छेदे शो य् निशाने षो य् नाशे पञ्च ओपराः।

इत्यजन्ताः ।

कान्तवर्गः ।

अकि क् लक्ष्मण्यकि ङ् गत्यां चाक् म वक्रगते ऽर्कं क ।
तापस्तुत्योः कक्ष हासे कक् ङिच्छागगर्व्वचापले ।
ककि ङ व्रजने कुक् ङ त्वादाने किष्क कङ् बधे ।
चक ञ ङ्ग प्रतीघातटस्थो ष्वीक कि मर्ग्गने ।
चक्र चिक्र चुक्र कर्त्तौ टकि क् बन्धेऽथ टीक टिक् ।
ढौक चौक तिक्र ङ् गत्यां तिक् नास्कन्दे बधे तकि ।
दौस्थ्ये तक् सहने हासे तर्क क् दीप्तौ चकि क् गतौ ।
द्रेक प्रैक्रङ् स्वनोत्साहे धक्र नक्र क नाशने ।
निष्क क् ङ माने फक्कासह्यवहारे शनैर्गतौ ।
बुक्र कि श्वादिशब्दे ऽथ मस्क मक्र ङ् गतौ मकि ङ् ।
भूषे रेक्रङ शङ्कायां रक्, लक, क् स्वाद आपने ।
लोक्र क् दीप्तौ लोक्र ङीत्वे वष्क वक्र ङ् गतौ वकि ङ् ।
कौटिल्येऽपि च ह्वक् ङ त्वादाने वल्क क भाषणे ।
शक ञ शक् निरू शक्तौ शकि ङ त्रासशङ्कयोः ।
श्वक् श्वक् श्वकि ङ शुक् सर्पे शोक्र ङ् सेके च शोक किं ।
आमर्शे च श्लोक्र ङ सङ्घाते शुल्क क् च सर्ज्जने ।
वर्ज्जने श्वल्क क् च भाषे षेक्र ष्वक्र ङ सर्पणे ।
ष्टक स्तक् मक्र प्रतीघाते सोक क्यामृग्रि सीक्र ङ ।
सेके स्वकि स्वल्क ङ च गत्यां स्वेक् सेक्र ङित्यपि ।
हिक्र ञ् कूजेऽथ हिक्र क् ङ हिंसे कान्तीनघटिका ।

खान्तवर्गः ।

इखिस्वीखुख्युख गतावीखृ शोषालमर्थयेः ।
कख् मे कक्ख खक्ख हासे णख् गतौ द्राख भ्राखृ तु ।
ओखार्थे मख् मखि यखि रखि रख् रिखि सर्पणे ।
राख् लाखृ ओखवल्लिख् ग्र लेखने लिखि लख् लखि ।
वखि वख स्रपि शाख् श्राखृ व्याप्तौ खान्तैकविंशतिः ।

गान्तवर्गः ।

अग मे वक्रगतेऽगी गि गत्यां कग् मे क्रियासु तु ।
जुगि त्यागे चगि गते त्वगि कम्पे गते तगि ।
खलने च तिग् न हिंसास्कन्दयोर्भगि सर्पणे ।
मार्ग क् संस्कारे च मार्ग क्वन्वेषे युगि वर्ज्जने ।
रग् मे शङ्के रग क् रङ्गत् रग् रिग् लिगि गतौ लिगि क् ।
चिचे लगि गतौ खञ्जे लग् मे सङ्गे लग क् रके ।
वगि खञ्जे वुगि त्यागे वल्ग अगि श्लगि व्रजे ।
पग ष्टग सग स्थम् मे संवृतौ स्वगि सर्पणे ।
ऋग ह्लग्, मे संवरणे गान्ताः स्युः सप्तविंशतिः ।

घान्तवर्गः ।

अर्घ मूल्ये ऽघि ङ गतौ निन्दारम्भजवेष्वथ ।
स्याद्गघ घगघ हसने चघ तिघ् दघ् न घातने ।
दघि त्यागे ऽवने द्राघृ ङ श्रमायामशक्तिषु ।
ङ भ्राघृ शक्तौ मघि ङ कैतवाप्यर्थयोर्भघि ।

भूषे तघि क् भासि रघि ङ् गमने राघ लाष्ट ङ ।
शक्लौ लघि ङ्ङभुग्गत्योर्लघि शोषे लघिक् त्विषि ।
वघि ङ्ङर्घ्यर्थके घ्रिघ्याघ्राणे घ्राष्ट ङ कत्थने ।
ष्टिघ्न ङास्कादि षघ् सघ्न हिंसे घान्तास्तु विंशतिः ।

चान्तवर्गः ।

अर्च क् पूजे अर्च चाचि चाचि अच ञु गतेऽनच् च ।
क्लिष्टोक्तौ चान्च क व्यक्ता वुचि र्य समवायने ।
ऋच् श्र नुत्यां कुच ज्रोधपर्कोटिल्यलेखने ।
कुच् तारशब्दे कुच श्रि सङ्कोचे कच् रवे कचि ।
कच् ङ बन्धत्विषोः क्रुच्च गत्यां क्रुन्च च वक्रणे ।
तौच्छ्ये खच ग् भूतिपूत्योरुत्पत्तौ ग्लुन्च् इर्गतौ ।
ग्रुच ग्लुचिरु चौर्ये च चञ्चितौ चर्च केङ्समः ।
चर्च जर्च झर्च शुल्लौ भर्त्स तन्च् ध सङ्कुचि ।
तन्च लञ्चि लच् स हत्यां पिच्च क् क्षेदे ङु औष्यच ।
पाके पचौ ङ पचिङ व्यक्तीकारे पचि क् ततौ ।
मृच् कि संयमने मृच् धौ च सम्पर्के मृचौ ल् ङ च ।
मचि ङुच्छ्रायधृत्यर्चाभासु मच् ङ च कल्कने ।
दम्भे शाठ्ये मुच् मुचि ङ् च मुच् क मोक्षे मुच् लृश्पञ्चौ ।
मोक्षे म्रुच् ग्लुच् इर्गत्यां म्रुन्च ग्लुन्च् मन्च् म्लुच् च ।
टु ङु याचृञ् याचने रिच् कि सम्पर्कवियोगयोः ।
रिचि ञ्रधौ विरेके रुक् ङल्ल प्रोतिप्रकाशयोः ।
लोचृ क् भासि लोचृ ङोचे लुन्चाप्लयने वचौ ।

वाचि वच् क च सन्देशे वचौ वाचि विचि लिंधौ ञ् ।
पृथक्त्वे व्यच श्रि व्याजे सम्बन्धे कङ् वन्च् वञ्चने ।
वन्चु गत्यां वर्च ङ् दीप्तौ व्रश्चू श्र् छेदे ह्रचौ ध् ह्रतौ ।
ग्रच ग्रचि ग्रचि ङ्त्यां ग्रच ङ् वाचि ग्रुचिर्यं ञौ ।
शौचे विशरणे क्लेदे शुच् शोके षच् ङ सेचने ।
षच् सम्बन्धे षन्च गतौ षिच् प शौञ् च्तरणे ष्टुच ।
ङ प्रसादे चकारान्ताः पञ्चाशत्समुदीरिताः ।

छान्तवर्गः ।

आङ्छायामिऽथोच्छि शुच्छे उछी श् वन्धसमापने ।
वर्ज्जनेऽतिक्रमेऽथर्च्छ श् मूर्त्तौ गमनमोहयोः ।
जर्च्छ भर्च्छ श भर्त्सौत्थोः प्रच्छौ श् ज्ञीप्सेऽथ पिच्छ श ।
मिच्छ श् बाधे म्लेच्छ् कि देश्योक्तौ मूर्च्छा मोहउच्छ्राये ।
युछ् प्रमादे लाछि लच्छ लक्षणे विच्छ क लिषि ।
विच्छ श् गतौ वाछि कामे स्वर्च्छ स्फुर्च्छा तु विस्मृतौ ।
हुर्च्छा कौटिल्यके क्षीच्छ लज्जे छान्तोनविंशतिः ।

जान्तवर्गः ।

अज क्षेपे गतेऽजि क् तु भास्यर्ज्ज त्वर्ज्जनेऽर्ज्ज क ।
संस्कारेऽन्जू घ ञि व्यक्तिगतिम्रक्षण ईजि तु ।
ईज् ङ कुत्से गतावुञ ग्राजवेऽथोर्ज क् जीवने ।
बलेऽथोर्ज ङ्तिस्थैर्यैर्जनार्जन ऋजिङ् भृजि ।

एजृङ् दीप्तावेजृ कम्पे ओलज्युत्क्षेपणे चजिक् ।
तङ्के चजि चज ष् मङ् दाग्त्योः क्षोज् क्षूज हिक्कने ।
कर्ज पीडे कुज खुज स्तेये रूर्ज व्यथास्तुजोः ।
खज् मन्थे खजि पङ्क्तुत्वे गज् मदे गजि च स्वनौ ।
गज गर्ज क् च गर्जोर्जाशब्दे रजि रज ध्वनौ ।
गुज श्वस्मिन् गुजि गुज कूजने जजि जज् युधि ।
जर्ज श् वाग्भर्त्सयोर्णिज् लि इर्जौ पेषे णिजि ल्ङ च ।
शुङौ तुजि क् भाषट्टार्थे तुजि प्राणे बले तुज ।
हिंसे तर्ज् कङ् तर्ज भर्त्से त्यजौ हानौ तिज क् क्षिते ।
तिज ङ् क्षान्तौ च तन्जु ध सङ्कोचे धृजि धृज् ध्रजि ।
ध्रज् ध्वजि ध्वज् ध्रिज गतावो नज् ङो क्ष्विये पूज क ।
पूजे पिजि क् भाषट्टार्थे पिजि ल ङ् वर्णपूजयोः ।
स्यात् पूजि ल ङ च सम्पर्के भज जौ भागसेवयोः ।
भज क् पाके भजि क् भासि भ्रेजृ ङ् च भ्राज ण ङ् टु च ।
भुजो शौ वक्रणे भुज् धौ त्राणे भ्रुजे भृजौ ङ तु ।
भर्जने भ्रस्जौ ज् श पाके भन्जो धौ मोटने मुजि ।
मुज् मन्ज् मार्ज क् मृजाध्वन्यो मृज् लू ष् शुद्धौ मृजू ष् कि तु ।
भूषे च मस्जो श ट्वौ स्यात् स्नाने युज कि संयमे ।
युजिर्धौ ज् च युतौ युज् यौ ङ समाधौ युज क् ङ तु ।
निन्दे यजै जो देवार्चादानसङ्गतौ रुज क् ।
हिंसे रुजो शौ भङ्गे रिज् ङृज्यर्थे रन्ज् य रन्ज मौ ज् ।
रागे रेजृङ राजृ ज् ण दीप्तौ लाज् लाजि भर्त्सने ।

भर्गेऽथ लस्जो श्रे लज् ङ व्रोडे लज् लजि भर्त्सने ।
लज् कान्तर्द्दौ लज लजि क् भाषदार्थे विजिर्लि जौ ।
वेके विजी धो दिज् ङो शा भीकम्पे ल् वृज् ङि वृज् ङ ली ।
त्यागे वृजी कि च वृजी ध् वृतौ व्रज गतौ व्रज क् ।
संस्कृतौ च विरेफो तौ शिजि ल् कि ङ्ङस्फटध्वनौ ।
षन्जो ञि सङ्गे ष्वन्जो ञि ङालिङ्गे षस्ज सर्पणे ।
